CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

6 Mfl-981 from Electrostat O.R.I University of Mysore

SCANNED

No- 3012 3013 3014

STUDENTS WELFARE SCHEME

जनहित

Janhit Long Exercise Book

Pages 76
(Inclusive of Cover)

Price Rs. 2.50

Name R.S. Sharma

Class Ph.D Work

Subject Sanskrit

Section A

College S.V.N.D. Hall 16

कीर्तिकान्त शर्मा / Kirtikant Sharma
सहायक आचार्य ग्रेड II
Assistant Professor Grade II
आई.जी.एन.सी.ए., जनपथ / I.G.N.C.A. Janpath
नई दिल्ली-110001 / New Delhi-110001

Can be had from :-

UNIVERSITY ELECTROSTAT
Ram Lal Anand College
B. J. Road New Delhi

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरवे केवल

सूचनापदानां व्यतिरिक्त

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साम्राज्यँ तव सायणाय ददतं क्षौंक्रान्ति साम्यासदम्।
वो नृषिनिति सम्पत्तिनामन्योन्य मौपम्य मभिव्यज्यते॥

आदिशब्देन परिणमसहोक्त्यादयो गृह्यन्ते। रसवदादिपदम्हति
शब्देन समाहितादयः। रसादिवादि शब्देन रसभावतदाभास
तत्प्रशमादयश्च। उत्प्रेक्षातु इवादिप्रयोगविधुरेविषये स्वयमेव
वर्णेनैव प्रतीयमानोक्ता। इतिरूपस्यापि ध्वनेरलंकारत्वमेव
भामाहादिभिर्भणितम्। सम्प्रतिवामनस्यमतं प्रदर्शयति

वक्रोक्त्यलंकारतयावक्त्रा सादृश्यलक्षणा।
वामनेनाप्यलंकारः कथितः काव्यन ध्वनिः॥

केवलं रीतिरात्मा काव्यस्यानेनचोदिता॥

24 गुणैः विशिष्टा रचनापदानां रितिरीता

गुणालंकारवर्गाणां साम्यवो द्वयादिभिः।
प्रोयोविषयमात्रेण भेदमाख्याय सूचितम्॥

तेहिशब्दार्थगोर्धर्मान् अलंकाराय इतिताः।
गुणास्संघटनाधर्मा इतिद्वैरसमर्थितम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिरन्तनानामिदमेवं काव्यालंकारकारिणाम् ।

काव्ये परमलंकारः प्रधानत्वेन सम्मतः ।

वामनस्तु सादृश्यात्लक्षणावक्रोक्तिरिति वक्रोक्तिं लक्षयित्वा " उन्मीलत्कमलं सरसिनो कैरवरंच निमिमील मुहूर्तमित्युदाहरणं प्रदर्श्य अत्रनेत्रधर्मान् उन्मीलन निमीलने सादृश्याद्विकास संकोचौ लक्ष्यते इत्युक्तवान् ।

सादृश्यंच तत्राश्रय (२५) भेदेन हेतु भेदलक्षणं । इत्थं २५ इत्थं सादृश्यलक्षणया वक्रोक्त्यलंकारत्वं वृत्तावामनेना विवक्षितवाच्याभ्यो ध्वनिरलंकारत्वेन कथितः । तत्रश्च वामनस्यापि भामहाद्यन्तःपातित्वमेव " केवलं गुणविशिष्ट पदरचनात्रिकाक्षितिरेवानेन काव्यालत्वेनचोदिता । उद्भटादिभि स्तु गुणवर्गणां संघटनाधर्मत्वेनालंकारवर्गणां शब्दार्थ धर्मत्वेनच प्रतिपादनात् प्रायेणसाम्यमेवसूचितं ।

तस्माद्वामनाभिमतमलंकारेभ्यो गुणानां वैशिष्ट्यं शब्दा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदि धर्मात् संघटनधर्मो नव्यतिरिच्यत इति प्रतिपादनेन
पुनरुक्तं। तस्माद्वामनप्रभृतीनां वामनपर्यन्तामलंकार
एव काव्यप्रधानत्वेन सम्मतमित्युक्तम् भवति। इत्थं
धर्मविशेषप्राधान्यवादिनां मतमुपन्यस्य व्यापारप्राधान्य
वादिनोः पूर्वं कुन्तकस्य मतमुपन्यस्यति। 25 वें दृश्य
अहो भणति स्वभावो कुन्तकोक्यवक्रोक्ति।

वक्रोक्तिः वहुधाभिन्नां प्राधान्यात्काव्यजीवितम्॥
व्यापार स्वप्राधान्यं काव्यस्य प्रत्यपद्यत।
अभिधायाः प्रकारस्य भेदा स्वल्पलंक्रियाः॥
प्रतीयमाने निर्विधे वियमाणि केवलं।
व्यापारस्तव हृणितिः कविसंरम्भगोचरः॥
तेनोपचार वक्रत्वमुरुधैः भेदैः प्रदर्शितैः॥
समस्तापि ध्वनेर्व्याप्ति सूचितैव पृथक् पृथक्॥
केवलं तू वितवैचित्र्यजीवितं काव्यमिष्यते॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यङ्ग्यार्थ जीवितं नेति तदीयं दर्शनं स्थितम्॥

25/B कुन्तकस्तु अलंकार्यशब्दार्थयोः कविकर्म कौशलविच्छित्याभणनं नाम विचित्रेवाभिधा। वक्रोक्तिर्नाम तामेवव्यापाररूपां बहुप्रकारविधमानां काव्यस्य जीवितत्वेनोक्तवान् तस्माच्छब्दशक्त्याश्रयाः प्रकारविशेषा एवालंकारः उपचारवक्रतादिभिरस्य सकलध्वनिप्रपंचे स्वीकृतेपि तत्प्राधान्यं नाङ्गीकृतं। कविसंरम्भगोचरत्वेन व्यापारस्य केवलं हृदयाह्लादविशेषात्मनि प्राधान्यमंगीकृतम्। तस्माद्वक्रितवैचित्र्यं जीवितं काव्यस्यान्यस्यार्थ जीवितमिति तदीयदर्शनं व्यवस्थितं तस्योपादान क्रमस्य॥

उभावेतावलंकार्यौ तयोः पुनरलंकृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरिष्यते॥

उभौशब्दार्थौ। वैदग्ध्यं विदग्धभावः। कविकर्म को

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारम्। तस्य अङ्गविच्छित्तिः तथाभणिति विचित्रैवाभिधा वक्रोक्तिः। अयमर्थः शब्दार्थौ पृथगवस्थितौ न केनापिव्यतिरिक्तेनालंकारेण योज्यते। किन्तु वक्रयता वैचित्र्य योक्तियाभिधानमात्र मेवानयोरलंकारः। तस्यैव द्योतकत्वय कारिकाद्वेते व्यापार प्राधान्यमिति। तदुक्तम्॥

शब्दार्थौ सहितौ वक्रकविव्यापार शालिनि।
बन्धेव्यवस्थिते काव्य तद्विदाह्लाद कारिणीति॥

वक्रकविव्यापारोनाम शास्त्रादि प्रसिद्ध शब्दार्थोपनिबन्ध व्यतिरेकवति वर्णविन्यास पदपूर्वार्धि प्रत्यय वाक्य प्रकरणप्रबन्धात्मक षड्विधातिषय वक्रता विशिष्ट क्रियक्रमोभिधीति। तथोक्तम्॥

वाक्यस्यवक्रभावोन्योभिद्यते यस्सहस्रधा।
अलंकारवर्गोऽयं सर्वोप्यत्रैवनिर्दिष्यतीति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपचारवक्रत्वमुख्यैरित्यत्र मुख्यशब्देन विशेषणवक्रतादयः परिगृह्यन्ते। उपचारवक्रत्वं नाम मामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानं। विकारराशिकी हस्तापचयं यश्चाङ्गेति तदुभयमपि लक्षणमूलस्य ध्वनिर्विषयश्च। सकारवारणपतिः परिमीलितानामिति क्रियाविशेषणे न स्मरण संभव यत्नोपि सुरसम्भूति सुरतातिशयानुभूतेः प्रतीयते। अत्र पदद्योतोऽर्थ शक्तिमूलोध्वनिः। अद्यापि मे वरतनोर्मधुराणि तस्यास्तान्यङ्गानि हृदयेकिमपि स्फुरन्ति यत्र किमपि विसंवृतिवक्रतया तदा वर्णविजातिया चित्तजमलक्तेरनुभवैक गोचरत्वे लक्षणमव्यपदेश्यं प्रकाश्यते। अत्रापि पूर्वध्वनिः॥ आम्रतं मह्नायकस्य मतं दर्शयति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रौढोक्त्याय पश्चात्यैव व्यापारं व्यञ्जनात्मकम्।

तस्य काव्ये तथाँशत्वं ध्वनावेव महानायकः॥

अभिधाभावकत्वाख्य व्यापारद्वितयात्मकम्।

न्यक्ष भावयन्तं शब्दार्थौ च भोगपर्यायनामकम्॥

रसैकचर्वणारूपं व्यापारं रसिकप्रियं।

प्रधानत्वेन विश्रान्ते भाजनं प्रत्यपादयन्॥

महानायकस्तु काव्येषु ध्वनिमतानुवर्तिभिः प्रतिपाद्य

माने वस्तुध्वन्यलंकारध्वनौ च काव्यनाम कश्चिद्वाच्या

दस्तेषां मतेस्तिचेदस्तु। तथापि तस्य काव्ये ऽँशत्व

मेव न प्राधान्यं प्राधान्यं पुनर्मुख्यार्थ प्रतिपाद

न व्यापृतशब्दगत विभावादि साधारणीकरणात्मक का

भिधाभावकत्वाख्यव्यापारद्वितय समतिक्रान्त

27/B

स्य न्यक्ष भावित शब्दार्थस्य रसैक चर्वणारूपस्य

भोगकृत्वाख्य विश्रान्ति धामेना व्यापारस्यैव नतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भुज्यमानस्य रसादेरिति प्रत्यायनम्। उभयोरप्येतयोरविशिष्टेऽपि व्यापारप्राधान्ये कुन्तकस्य मते विशिष्टाया अभिधाया एव प्राधान्यं लक्षणाव्यापारोऽपि तस्याः पुच्छभूततया तत्रैवान्तर्भवति। भट्टनायकस्य मतेतु शास्त्रकाव्यसाधारणं दृश्यत्वलक्षणात्मकाभिधा व्यापारातिवर्तिनं विभावादिसाधारणीकरणात्मकं भावकत्वं नाम कमप्यपूर्वं व्यापारं स्वीकृत्यतदुपरिन्यक्तात्मनं शब्दार्थं रसादिभोगकरणं रसादीनांचर्वणारूपं भोगापरनामधेयं तृतीयमपिव्यापारं अंगीकृत्य विश्रान्तिधामत्वेन तस्यैव प्राधान्यमुक्तं। अतएव रसिकप्रिय इत्युक्तं प्राक्तनैरपि। किञ्चिदाधिक्यात्।

इत्यभिधीयमानां आनन्दादीनां [28] मतानिरूपयन्नाचार्यो पन्यस्य स्वयुक्तिवैदुष्येण तेषामसाधुत्वमुपपादयितुमानन्दवर्धनमतमुपन्यस्यति।—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभिधाकक्षगाश्चाँच तात्पर्याच्च पृथक् स्थितैः।
ध्वनन द्योतनादीनां वाच्यता वाच्यतामुखैः॥
अवश्याभ्युपगम्यत्वाद्व्यापारस्याञ्जनात्मनः।
व्यापारस्यच वाक्यार्थभागाभावविनिर्णयात्॥
गुणालंकारौचकार्यभावेन व्यञ्जकत्वपिण्डः।
वाक्यार्थस्यैव विश्रान्तिधामत्वप्रतिपादनात्॥
प्राधान्यध्वनिकारस्तु प्रत्यपादयदासताम्।
व्यापृतेर्विषयद्वारा स्वरूपप्रतिलम्बनात्॥
तत्प्राधान्येनैव जातप्राधान्यस्यपरिग्रहात्।
28/B स्वरूपेणाविचार्यत्वाभागसिद्धाङ्गहानितः।
सर्वभारसहिष्णुत्वाद्विषयस्यैव केवलं।
जीवितत्वेन वक्तव्यो व्यंग्यविषयस्तुवाद्॥
गुणालंकारौवक्रतासौन्दर्यक्रियात्मकम्।
सामृद्ध्यं यस्य कस्यैव जीवितत्वंहि युज्यते॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नालङ्कारतयावाच्यावाच्यास्तस्मात्प्रधानस्यते ।

प्राधान्यंवैव्युत्पत्तेर्यास्तैरुपस्कारकादिभिः ॥

तद्भंगयैव वाक्यार्थः काव्यजीवितमिष्यते ।

वाक्यार्थविसहृदय माह्लादपदोयमेवहि ॥

व्यापारस्यव्यञ्जनस्य सर्वैवव्यञ्जनसहृदात् ।

पदान्तरा प्रतिष्ठानात्तदनाश्रयणेपिचि ॥

29 अस्यैवालोच्यइत्यनिष्ठो व्यापारोव्यञ्जनालक्षणो काव्येनिर्दोषगुणवच्चलक्षणार्थं साङ्गःसूचितः ॥

आनन्दवर्धनाचार्यपादस्तु

अभिधानहेतवा तात्पर्यस्य व्यापारत्रितयवर्ती व्यञ्जनध्वनन्नादि शब्दवाच्य व्यापारविशेष स्वीकारेपि संवादको यामहादिर प्रतिपादितेष्वपि पर्यायोक्तादयनंकारेषु प्रतीयमानस्यार्थस्याभिधानहेतुत्वं तात्पर्यस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यापारे दुरवगमत्वात् तदवगमसिध्यर्थं ध्वनन द्योतनादि शब्दवाच्यं व्यापारान्तरमवश्यं स्वीकर णीयं। तदभावे भक्तितिवादिनामर्थान्तर गम्यतोपलक्षितानां पर्यायोक्तादिनामुच्छेद स्यात्। अतस्तव्यञ्जनव्यापार स्वीकरणीय इति व्यञ्जनव्यापारस्यावश्यं स्वीकार्यत्वं प्रतिपाद्य तदुपरि व्यापार प्राधान्यवादिनामुद्दिश्य सर्वेषां मते व्यापारस्य वाच्यार्थलाभावनिर्णया च्च व्यञ्जकस्य वाच्यार्थस्यैव गुणालंकारोरूप कर्तव्यत्वेन विश्रान्तिधामत्वात् प्राधान्यं। तस्मा सरस्वाला काव्यस्येति प्रसपादयत्। काव्यं तु व्यञ्जनव्यापार प्रधानमिति हि भवता प्रतिपाद्यते तर्हि तस्यैव व्यापारस्य प्राधान्यादत्वं भवतु किमनेन व्यापारेण व्यज्यमानेनार्थस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राधान्यमिति विवदन्तं व्यापारप्राधान्यवादिनम्
द्वितीय व्य ~~व्यापार~~ व्यापारस्य विषय भूतमन्यमा
नार्थसमुपलम्भद्वारेणैव स्वरूपसिद्धेः प्रधान
भूततदुत्पाद्यार्थप्रतिपादनमुखेनैव स्वस्य प्राधान्य
स्वीकारात्- ~~तच्च~~ तद्व्यतिरेकेण निरूपाख्य प्रख्य
~~च~~ व्यापारस्यासंभवं सर्वदानुपपन्नं। तर्हि
व्यापारगम्यस्यार्थस्य कथं प्राधान्यमिति चेत्-
आश्रयिणस्सर्वेप्याश्रयभूतं वस्तुसमाश्रित्य
तस्मिन विन्यस्त सर्वभारा: विश्राम्यन्ति। तदु
आश्रयिणंभारमसोढुं स्वयमुद्वहति। तद्वत्या
पारस्याश्रयभूतौ व्यङ्ग्यस्वार्थस्तदीयं सर्वं
भारं सहते। तस्मात् सरस्व काव्यस्य जीवि
तत्वेन प्रतिपादनीयः। तच्चयुक्तियुक्तमिति
प्रतिपादयितुमर्थान्तरन्यासेन समर्थयते। यद्यपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिर्गुणैहीनादिभिरलंकारैरनुप्रक्रीयमाणा
सौन्दर्य स्वीक्रियालक्षं साम्राज्यं यस्य तस्यैव
ह्यालम्बंयुज्यते। नतु गुणानां नाप्यलंकाराणां
न च व्यापाराणां तस्मात्काव्यस्य व्यंग्यत्वे
नभीवित भूतवस्तीदयो नालंकारत्वेन वाच्याः
तर्हि प्रधानतया अलंकार्याः। तैरलंकृतैः
तस्माद्व्यंग्य एवार्थः काव्यस्य जीवितमिष्यते।
अधस्तनास्तादेय पक्षो वाच्यार्थ विद्भिः
सहृयैस्सर्वैरपि गृहीतव्यः इदं
30/B युक्तिमदेव समर्थितमर्थं प्रतिष्ठापयितुं
पुनरपि प्रतिपाद्य निगमयति। व्यञ्जनव्यापारस्य
सर्वैर्भामहादिभिश्चतुर्भिरप्यनपह्नवात् द्वमाश्रयणे
पक्षान्तरस्याप्रतिष्ठा भूदिति व्यञ्जनव्यापारान
ङ्गीकारे पर्यायोक्ताद्यलंकारानुदय प्रसंगश्च। तेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्भटादि मतस्याप्रतिक्षानादि. पूर्वोक्तानपरो
स्यैव। श्रीमानन्दवर्धनाचार्य पादसमार्पितैर्ये
तस्मिन् अर्थेमपि जीविते कथं व्यञ्जनस्यानपह्नुत
वमिति कुतर्कसरिञ्चीन कार्श्यचेनजल्पतो माह
म्मच्च मतमुपन्यस्य निरस्यति।

वाच्यस्य लिंगभावेन व्यज्यमानं प्रतीहतु।
व्यञ्जनस्यानुमानान्तर्भावं यन्माहिमाश्युधात्॥
अविचार्यैव तल्लोकं तेनव्यक्ति विवेकिना।
वाच्यस्य व्यज्यमानेन नतादात्म्यतस्तु द्वये॥
क्षोदक्षमीयं कुवाक्षीयाधिषणैव वचेबलम्।
अरेचतच्चरहुनमितिनेह प्रतन्वते॥

उक्तप्रकारेण समर्पितव्यञ्जन व्यापारसम्पृक्ता
काव्येव्यज्यमानेमर्थेप्रति वाच्यस्यार्थस्य लिंग
भावमङ्गीकृत्य व्यञ्जनव्यापारस्या अनुमानान्त

Kirtikant Sharma Collection, Najafgarh

.CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अर्थमाभिदधाति वृत्तिविषयविवेक कारिणमाहिम्ना
अलंकारिकैरा विचारविधुरमुक्तं। व्यज्यमान
अर्थं प्रतिपाद्यस्यार्थस्यानुमानप्रयोजकयोस्त
दाख्यादुभयोरन्यतरासद्भावात् तादात्म्यस्य
किं वापात्वा दूषणत्वानुमानं वाच्यव्यंग्ययोस्तदुभय
मपि नास्ति। तदेतत्काव्यप्रकाशकारेण विविच्य
प्रतिपादितं तस्मादस्माभिरस्मिन् अलंकारशास्त्रे
तत्प्रतिपादनं कुक्षागतसद्भावगर्भिणीवेव
31 दौहदीयतया अतीव दुरवगाहमिति नविस्त
र्य प्रतिपादितं इत्युक्तं काव्यप्रकाशकारेण
पञ्चमोल्लासे संकीर्णप्रभेदनिर्णये प्रतिपादित
क्रमश्चात्र द्रष्टव्यः॥ सम्प्रति प्रस्तुता
लंकारिकं तच्चिरस्य ध्वनिं प्रतिष्ठापयति।
प्राधान्येन ध्वनिकृता तदेवं स्थापितो ध्वनिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।निरस्य मतमन्येषाँ मालंकारिक मानिनाम् ॥

अत्र मतानां भिन्नत्वेपि ध्वनेरप्राधान्य विषय
मैकमत्यमँगीकृत्यो क्तँ मतमिति। इत्थमालक्ष्येन
क्रमेणँ समर्थ्य तस्य प्राधान्याप्राधान्यास्फुटत्वैः
काव्यस्य त्रैरूप्यँ प्रतिपादयति।

प्रधानगुण भावाभ्यां व्यङ्ग्यस्यौत्तम मध्यमे।
काव्ये ध्वनि र्गुणी भूत व्यँग्यमित्युदिते त्रये ॥
तस्यास्फुटत्वेनलँकार प्राधान्ये काव्यमिति।
चित्रशब्दार्थ विषयमधमँ चित्रमिति ॥

यस्मिन् काव्ये वाच्याद्व्यँग्यस्य प्राधान्यँ तत्का
व्यमुत्तमध्वनिरिति च व्यपदिश्यते। यत्रपुन
र्व्यँग्यो वाच्यादेरूपसर्जनी भवति तन्मध्यमँ
गुणीभूतव्यङ्ग्यमिति चोच्यते। यत्तु व्यँग्यस्या
स्फुटत्वँ चित्रशब्दार्थ विषयालँकार प्राधान्यँ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

~~वक्रो~~ वक्रकाव्यमध्यमं शब्दचित्रमर्थचित्रमिति च द्विधा प्रतिपाद्यते काव्यप्रकारेण व्यंग्यवैचित्र्य काव्यलक्षणत्वेन प्रतिपादितेपि भवता अस्फुट व्यंग्यमितिलक्षणं कृतमिति वदंतं प्रत्युत्तरयन्नाहः॥

व्यङ्ग्यस्य सत्वाच्छायापि यत्नाय्यैवस्थितिम्।
अलंकृतमलंकारैरपि काव्यं नतद्भवेत्॥

32/b यस्मिन् काव्ये व्यङ्ग्यस्यास्तित्वाच्छाया काव्यवस्थानमिति।

तदनेकेऽपि अलंकारैरलंकृतमपि काव्यमेव न भवति। तदनेकैरलंकारैरलंकृतमपि काव्यमेव न भवति। तस्मात्सर्वत्र काव्यशब्द व्यपदेश हेतुरस्तित्वच्छायामात्रेणाव्यवस्थितो व्यंग्यः। नन्वत्र्यलंकारादिः कथमेव व्यक्तिविवेकं दर्शयति। सख्यामहो कवि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गिरामलंकृतिभृतामपि प्रतीयमानच्छायैव
भूषालङ्गेव योषितास्। यथा केयूर हरनूपुरा
द्येनेकालंकारालंकृतानामपि स्त्रीणां
नालङ्गेव मुख्य भूषाभवति तथा चित्रयमक
श्लेषाद्येनेकालंकारालंकृतानामपि महाकवि
गिरां प्रतीयमानार्थच्छायैव मुख्या भूषाभवी
मवतु च्छाया मात्रेणापि धनेषु ....
.... चित्रयमकश्लेषाद्यलङ्कृतिं व्युत्पत्तिमा
त्रफले काव्ये कथंकरमाहृदबतु व्यङ्ग्यच्छाये
तिवादिनां प्रत्युच्यते। निर्गुणं न भवेत्।
तस्माद्रसेन केनापि काव्यं चित्रेप्यनुच्चिता।
अनुद्भटत्वाद्व्यङ्ग्यानामव्यंग्यं चित्रमीदितम्।
व्यंग्यस्यात्यन्त निच्युतिः काव्येकुत्रापि
.... नेवभवितव्यं। गुणश्च रसधर्मि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्याचिजेपि काव्ये अनुषजत्व केनापि
वसेन भवितव्यम्। अन्यथा काव्यशब्द
विषय लाभ्यात्। तर्हि ---- मुक्तकेष्वांवां
क्याह अनङ्गगल्वादिति। अनुङ्गव्यंग्यस्य
यंग्यमनुदरा कन्येति यावत् तस्माद्व्यंग्यार्थ
विवक्षितः कुत्रापि काव्येनेष्यते। ---
द्वितीयेत्र काव्ये व्यंग्यार्थच्छायानुवृत्तिः
तथालंकारे उत्तम काव्ये ध्वनावत्यलंकार
छायानुवृत्तिरित्याह - अन्येत्वेतु यद्वनालंकारे
तथालङ्कारवासनाप्याख्यातम्। इत्यं त्रैविध्येन
प्रतिपादिते काव्ये ध्वनिगतत्वेन या प्रतिपाद्य
मानतामाश्रयभूतस्य काव्यस्यार्थस्य वा प्रा
धान्येन व्यपदेशेपि तत्रस्वस्यापि उपसर्जन
त्वेनोपक --- वस्तुनोरेकस्यैवैकत्र कार्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारित्वेपि तस्याविनाभावेन तत्सहकारिभावोयु
ज्यत इति प्रतिपादयति। शब्दार्थाभ्यन्तरायत्तं
यत्रध्वनिचित्रयोः प्राधान्यं तत्र तस्य स्याङ्गभूतस्य
परस्यतु ध्वनिचित्रयोरिति गुणिभूतस्य तथ्यज्ञेय
स्याप्युपलक्षणम्। अन्यद्व्याख्यातम्। एतदेव
समर्थयते सामान्येन।

एकस्य कारकत्वेपि नित्यसम्बन्धयोर्द्वयोः
परस्य वा सहकारित्वं युज्यते सर्वकर्मसु"

सर्वकर्मसु लौकिकेषु भूषणविलेपन तिलक
ताम्बूल गृहादिषु दक्षिणश्मश्रुकरयोरिव अन्य
श्चापि कर्मसु वह्निमारुत तयोरिव अन्यद्व्या
ख्यातं" यत्रध्वनावलंकारेवा समुत्तौ
शब्दार्थयोरुभयोरपि निष्पादकत्वेन प्राधान्यं
सम्प्रतीयते। तत्रध्वनेरलंकारस्य च उभय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गतत्वमेव प्रतिपादनीय्यमिति प्रतिपादयति।
तयोर्द्वयोश्च प्राधान्यं समं यत्र प्रतीयते।
अतः ~~अयत्नेन~~ भावतत्वेन ~~स्थापनीयं~~
न संशयः॥

सामान्य निर्देशात्पुंसकस्संस्कारः। दोष
गुणालंकाराणां व्यंग्यस्यापि शब्दार्थायत्त
त्वेन समाने कथं ध्वनेरात्मत्वमित्याशंक्य
परिहरति। 34/B.

Kirtikant Sharma Collection, Najafgarh